तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वात्· न चैवमपि तदीयस्य साध्यतावच्छेदकीभूतस्वरूपसंबं
देग धावच्छिन्नप्रतियोगित्वस्याप्रसिद्ध्यानैसंगतिः पूर्वक्षणावृत्तित्वादिविशिष्टस्य घटाद्यभावस्याभाव एव तत्र प्रसिद्धेरिति प्राहुः
॥ स्वावच्छेदकसंबंधावच्छिन्नयन्निरूपकस्याभावप्रतियोगिसामान्यानधिकरणाद्धेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्य
यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभाववत्त्वमिति लक्षणाभिप्रायेणेदं· संयोगेन घटाद्यभावस्यैव प्रतियोगिवैय
धिकरण्यसत्त्वस्यादित्यपि वदंति· प्राचां मते संयोगसामान्याभावसाध्यकमात्रस्य तत्त्वं विरुद्धमतः कपिसंयोगसामान्याभाव
उक्तः वृक्षाद्यवृत्तित्वकालावच्छेदेन गुणसामान्याभाववत्त्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः· यद्यपि वृक्षादेः स्व एप०
समवेतकपिसंयोगसामान्यस्वरूपाभावप्रतियोगिनः समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य चानधिकर १८

गुणत्वाद्व्याप्यत्वादेरपिहेतुतायामव्याप्तिःसंभवत्येवतथापिसत्ताद्रव्यत्वयोरेकसमवेताभाववद्द्रव्यमात्रसमवेताभावयोरभा
वत्वंलाघवान्नतुकपिसंयोगाद्यात्मक समवेतमात्रस्यतथात्वंगौरवादित्याशयः गुणसामान्याभावस्यसंयोगप्रतियोगि
त्वमाविष्कर्तुंगुणानामित्युक्तं तत्प्रतियोगितेति कपिसंयोगीयप्रतियोगितावच्छेदकेत्यर्थः नचगुणसामान्याभावस्या
भावेद्रव्यत्वमेवलाघवान्नतुगुणाः गौरवादतः संयोगप्रतियोगित्वंनगुणसामान्याभावस्येतिवाच्यं घटादावुत्पन्नदृश
यांगुणसामान्याभावस्यैवसत्त्वेनद्रव्यत्वस्यतदभाववत्त्वासंभवादभावाभावस्यप्रतियोगित्वनियमाच्चेतिभावः यादृशेति
तथाचगुणसामान्याभावनिष्ठप्रतियोगितायांअवच्छेदकंयद्गुणसामान्याभावत्वंहेतुमत्स्तदवच्छिन्नानधिकरणत्वेपिक
पिसंयोगाभावत्वस्यतादृशप्रतियोगितानवच्छेदकत्वान्नतादृश्येणसाध्यतायामात्मत्वेहेतौनाव्याप्तिः द्रव्यत्वाभाववान्सत्त्वादि
त्यादौतुद्रव्यत्वाभावत्वावच्छिन्नानधिकरणत्वंयद्धेतुमत्तस्मिन्निष्ठाभावस्यतादृशप्रतियोगितावच्छेदकमेवद्रव्यत्वाभावत्वमतो
नातिव्याप्तिरितिभावः नचवन्हिमान्यवेतत्वादित्यादेरन्तद्वान्हिसंयोगसंबंधेनसाध्यतायामव्याप्तिः तत्संबंधावच्छिन्नघटाघ
भावप्रतियोगिनस्तेनसंबंधेनाधिकरणाप्रसिद्धेरितिवाच्यं यत्प्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितस्व

निरूका[redacted]धिकरणत्वाभाववत्वंचहेतुमतो ४ तत्साध्यकएतत्वादौ ४

रूपसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्वं हेतुमतस्तेन संबंधेन तादृशप्रतियोगितान
वच्छेदकत्वस्य विवक्षितत्वात् घटत्वावच्छिन्नाधिकरणतासामान्यस्यैव वन्हन्हृत्ति निरूपितसंयोगसंबंधावच्छिन्नाधिकरण
तानिरूपितस्वरूपसंबंधेनाभावस्य हेतुमतिसत्वेन तादृशसंबंधेन घटाभावस्यैव प्रतियोगिव्यधिकरणत्वसंभवात्. वाद
शाभाववत्वं चौनिरवच्छिन्नविशेषणतयैव वाच्यमतः कपिसंयोगाधिकरणत्वाभावस्य वृक्षहृत्तित्वेपि नाव्याप्तिः अत्र च प्र
तियोगितावच्छेदकधर्मेणावच्छिन्नत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यं. तेनायः पिंडस्यापि कालिकसंबंधेन धूमत्व
विशिष्टत्वात्तादितस्य संयोगेनाधिकरणत्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकताघटकसंबंधेन तद
वच्छिन्नत्वनिवेशे तु प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यमन्यथा विषयि
तासंबंधेन रूपत्वावच्छिन्नस्य ज्ञानादेः पृथिव्यादौ समवायेनाभावसत्वाद्रूपवान्पृथिवीत्वादित्यादावव्याप्तिप्रसंगात्. वस्तु
तः साध्यतावच्छेदकताघटकसंबंधावच्छिन्नयत्प्रतियोगितावच्छेदकत्वं तन्निरूपितस्वरूपसंबंधेनैव निरूक्तप्रतियोगिताव
च्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यः तेन वन्हिमान्धूमादित्यादौ पर्वतीयवन्हित्वेन रूपित समवायादिसंबंधेनव

न्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्ध्या
वपिनस्तेतिरिति ध्येयं ॥ अत्र यादृशप्रतियोगितावच्छेदकधर्मिता दृशप्रतियोगिताश्रयाधिकरणीभूतपर्वतौक्तौ निष्ठाधिकरणता द्य
स्य नवच्छेदकत्वस्याधिकरणतावच्छेदकत्वं च हृयोर्व्यतिरेकस्तत्तद्व्यक्तिभेदकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्ना
नधिकरणत्वमित्यस्यार्थो बोध्यः ॥ तेन धूमवदिन्नादिप्रतीतिस्वरूपकृताभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्टधूमत्वावच्छि
न्नाधिकरणताभिरेवोपपत्तौ धूमत्वाद्यवच्छे धर्मावच्छिन्नाधिकरणतायां मानाभावात् ॥ धूमादेः सामान्याभावप्रतियोगितावच्छे
छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणताप्रसिद्ध्या वा यद्धूमवान् वह्नेरित्यादौ नातिव्याप्तिः धूमाधिकरणतत्तद्व्यक्तिभेदकू
यत्र टस्यादाय वै धूमसामान्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यासंभवादिति ध्येयं ॥ न च प्रतियोगित्वं नातिरिक्त
पदार्थः प्रतियोगित्वादिकं तु स्वरूपसंबंधविशेषः इत्युक्तग्रंथविरोधात् किंतु स्वरूपसंबंधविशेषः स च यदि प्रतियोगिस्वरूपः तदा स्व
वह्निमान् धूमादित्यादौ सर्वत्रासंभवः घटादिस्वरूपस्यैकस्यैव घटाद्यभावप्रतियोगित्वस्य घटत्वसमवेतत्वज्ञेयत्वाद्यवच्छिन्नतया
तादृशावच्छेदकीभूतज्ञेयत्वाद्यवच्छिन्नस्य हेतुमति सत्त्वात् प्रतियोग्यधिकरणाभावाप्रसिद्धेः न च प्रतियोगितावच्छेदकस्वरू

२० २०

पमेवप्रतियोगित्वमित्यदोषः समवायेन वन्हेः साध्यत्वे धूमादावतिप्रसंगात्समवायावच्छिन्नवन्ह्यभावस्य वन्हित्वस्वरूपं यत्प्रति
योगित्वं समवायवत्संयोगस्यापि तदवच्छेदकसंबंधतया स्वावच्छेदकीभूततादृशसंबंधेन साधनवतः प्रतियोग्यनधिकरणत्वाभा
वात्प्रतियोगितावच्छेदकीभूतयत्किंचित्संबंधेन प्रतियोग्यनधिकरणत्वोक्त्या तद्वारणे तु संयोगेन वह्निसाध्यके धूमादावव्या संबंधेनाप्य
प्तिः समवायावच्छिन्नवन्ह्यभावस्यैव समवायेन प्रतियोग्यधिकरणस्य वन्हित्वस्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगेनावच्छि
न्नत्वादिति चेदत्र वदंति प्रतियोगिस्वरूप[redacted]मवच्छेदकस्वरूपं वा यत्प्रतियोगित्वं तदपि कस्यचिदभावस्य केनचिदेव धर्मेण सं
बंधेन चावच्छिन्नं व्यवहारबलात्तत्र तु स्वेन धर्मेण संबंधेन वा समवायावच्छिन्नवन्ह्यभावप्रतियोगित्वं संयोगसंबंधावच्छिन्नमित्या
य दिव्यवहाराभावान्न तथा च यदभावीययत्प्रतियोगितावच्छेदकसंबंधेन तदभावीयतत्प्रतियोगित्वनिरूपितावच्छेदकीभूतध य
र्मावच्छिन्नासंबंधित्वं हेतुमतस्तदभावीयतत्प्रतियोगित्वनिरूपितावच्छेदकताश्रयत्वं साध्यतावच्छेदके विवक्षितमित्यदोषः।
यत्प्रतियोगितेत्यपहाय यादृशप्रतियोगितेत्यभिधानादेव तादृशार्थलाभात् तन्न च प्रतियोगितावच्छेदकस्वरूपं प्रतियोगित्वं त श्रीराम ०
त दायदभावीययादृशप्रतियोगितावच्छेदकसंबंधेन तदभावीयतादृशप्रतियोगितावच्छिन्नस्यानधिकरणत्वं हेतुमतस्सेव स २०

यदि २

म्यकप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशो व्यर्थ इति वाच्यं वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तेः हेतुमन्निष्ठा साप
त्रस्यैव वह्निधूमोभयत्वावच्छिन्नाभावप्रतियोगिमत्वादित्यस्य हेत्वधिकरणाश्रयत्वसामानाधिकरण्य इति साध्यसामानाधिकरण्य
इत्यर्थः संबंधविशेषेणैव साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिः तद्ग्रहप्रतिबंधकतयैव विरोधस्य हेत्वाभासत्वमिति
मतेनेदं यदि तु येन केनापि संबंधेन साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिः स्वव्यापकसाध्यसंबंधितामात्रं वा व्या
प्तिः व्यापकत्वदले साध्यसाधनयोः संबंधविशेषप्रवेशादेवातिप्रसंगभंगादिति विभाव्यते तदा परामर्शे साधनस्यानुमि न
त्यां च साध्यस्याश्रयत्वं यत्प्रकारकधर्मितावच्छेदकधर्मेणावच्छिन्नसामानाधिकरण्यं तत्र प्रविष्टाया दृशः संबंधस्य यो बोध्यः धूमवा
न्वह्नेरित्यादौ महानसीयसंयोगेन संदिग्धे तौ संयोगमात्रेण हेतुमत्ताज्ञानादायाप्याप्तिः एवं द्रव्यत्वसाध्यके घटानुयोगिकसमवा
येन सत्त्वादिहेतौ समवायमात्रेण तद्धेतुमत्ताज्ञानादायापीत्यतो यः संबंध इत्यपहाय यादृशः संबंध इत्युक्तं साध्यस्य चेति प्राग्वत्सा
न मानाधिकरण्ये प्रविष्टस्य यः धूमाधिकरणे तत्तत्संयोगेन वह्निसामान्याभावसत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिरतो त्रा
पि यादृशेत्युक्तं तेन संबंधेन यो हेतुमानित्यस्य फलमाह धूमसमवायीति प्रतियोगितायाइति स्वावच्छेदकत्वेपि वह्नित्वस्य त

२१ न्वयः साध्यस्य चेत्पादेः फलमाह धूमसंयोगीत्यादिनन्तु तादात्म्येन गवादेः साध्यत्वे सास्नादावव्याप्तिः तत्र साधनवन्निष्ठान्योन्याभा
वप्रतियोगितायाः साध्यताघटकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्य स्वरूपमेव वक्ष्येऽधिकारो टिप्पण्यामुक्तत्वात् एवं धनी
चैत्रत्वादित्यादौ वृत्तिनियामकस्वामित्वादिसंबंधेन साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः तत्राह यद्धेति
यत्नु प्रतियोगितावच्छेदकसंबंधेन तद्धेत्वधिकरणप्रवेशस्य पुनः प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षा
यां गौरवात् यद्धेत्यादिकल्प इति तत्संबंधानवच्छिन्नत्वं तत्प्रतियोगितावच्छेदकभेदकूटघटितत्वेन यद्धेत्यादिकल्प
स्येव गुरुत्वात् इत्याहुः संबंधभेदेन साध्यतावच्छेदकसंबंधेन नतु संबंधविशेषेण साध्यसाधनयोः सामानाधिकरण्यप्रवेशात्
दात्म्येन हेतुसाध्यभावेऽव्याप्तिः तत्संबंधेन साध्यसाधनयोरधिकरणाप्रसिद्धेः तत्राह एवं स्थित इति संबंधविशेषनिवेशे सिद्धे
ते इत्यर्थः सामानाधिकरण्यादावित्यादिपदे तद्धेतुसामानाधिकरण्यनिविष्टहेत्वधिकरणस्य परिग्रहः प्रयोजनमाह तथा
चेति धर्मिणापीति तादात्म्येन व्याप्यत्वं व्यापकत्वं च निर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोः साध्यस्य चाधिकरणाप्रसिद्ध्या राम॰
न तन्निर्वाह इति भावः योऽन्योन्याभाव इति योऽभाव इत्येव वक्तुमुचितं अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयं तदनवच्छे २१

नयोक्तमतइयत्वन्यपर्वताधडयोगितर्कस्य संबंधितदन्यसंबंधेऽस्मयत्रवृत्ति प्रति तावेशेषणताविशेषणाचाताद्दशप्रतियो

योगेन साध्यतायां तत्तद्वमेऽव्याप्तिः तादृशप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिनो यदधिकरणं तदन्यत्वस्य साध्यतावच्छेदकसंबंधेन यत्प्रतियोगि
तिवाच्यं तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितविशेषणताविशेषेण साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपि
ग्याधिकरणत्वसंभवात् सामान्याभावस्योक्तत्वात् अन्यथा कालिकादिसंबंधेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वात्प्रतियोग्यनधिकरण

[illegible]

३ एवमिति सामानाधिकरण्यादौ संबंधितनिवेशे कृते इत्यर्थः धर्मिणा इति वस्तुत इत्यर्थः तथा च गौः साक्षात्वताहृङ्गिमान्धूमो इत्यादौ तादात्म्यसंबंधेन व्यापकताल्या पर्वपि संगच्छते इति भावः ३ =ता=

म दकवन्हित्वेति । वन्हिमत्त्वं वन्ह्यधिकरणत्वं तथाधिकरणव्यक्तीनां भेदे किन्नाभिन्नमेवेत्याशयेनेदं अत्र साध्यसाधनयोरिवत

दीयसंबंधयोरपि भेदेन व्याप्तेर्भेदात्तादात्म्येन हेतुसाध्यत्वस्थले हेतुनिष्ठाभावप्रतियोगिसाध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचिता

लाघवादिति वदंति । ननु तादात्म्येन धर्मिणो धर्मव्याप्यतायामप्रसिद्धा तद् इत्यत आह अत एवेति धर्मिणो धर्मव्याप्यत्वादे

तत्रतत्र वित्यर्थः व्यतिरेक्यादिस्थले न तु समवायेन जलत्वादेः पृथिवीत्वाभावव्याप्यत्वे परतयैव तद्दुर्घसंगतिरित्याशंक्य तथा सति

पृथिव्यां जलत्वादिभेदसाधनार्थं तदुपन्यासो न स्यात् व्यापकभावेन व्याप्यताघटकसंबंधावच्छिन्नव्याप्याभावस्यैवासिद्धे

रित्यन्यापि निदृष्टांतपूर्वकं परिहरति यथा चेति पक्षविशिष्टेति पक्षविषयकेत्यर्थः प्राचां मते पक्षविशिष्टकृत्स्नाव

स्यैव पक्षप्रकारकज्ञानस्यापिकारणत्वात् धूमावयव इति वन्हिधीरित्यन्वयः महानससंयोगेनेति नतिवर्तते इत्यन्व त

न यः संयोगावच्छिन्न[illegible]भावानुमितौ भासते इति तदर्थः निवर्त्तते चेति धूम इति पूर्वेणान्वयः तादात्म्येनैवेति सम

वायेन व्याप्यतायां तु समवायेन जलत्वस्यात्यंताभावस्यैवासिद्धेरिति जलभेदसाधनार्थं तन्न तं थावत्तोऽन स्यादिति भावः

नन्वेतावतापि तादात्म्यावच्छिन्नजलत्वाभावः सिद्धो न तु जलान्योन्याभाव इति तत्दोषतादवस्थ्यमत आह स एवेति ध

२२ म्निरोधधर्मव्याप्यत्वेप्राचांसंवादमुपन्यस्यधर्म्मिरोधधर्मिव्याप्यत्वेतन्मा हृ इत्यमेव चेति · धर्मिरोधव्यापकत्वेयुक्तिमप्याह, अत्र
द्रू तु एव चेति · धर्मिरोधधर्मव्यापकत्वादेवचेत्यर्थः तत्वयंगोरित्यनुमितिर्गवेतरावृत्तित्वरूपायाः शुद्धगोत्वानिरूपितव्याप्ते
22 र्ज्ञानात् सम्भवपि मानिरवच्छिन्नगोत्वसाध्यकेऽनुभविष्यतिसाध्यवदन्यावृत्तित्वरूपायाश्चापिव्याप्तेरनुमितिहेतुत्वस्यापि
वाच्यत्वात्तस्तादृशानुमित्यनुरोधाद्धर्मिरोधव्यापकत्वस्वीकारोऽनुचितइत्यत आह गोत्वत्वेति · गोत्वत्वावच्छिन्नतरावृत्तित्वंत त
थाच गवेतरावृत्तित्वरूपायागोत्वव्याप्तेर्ज्ञानदशायामुत्पन्नायाः अयंगोरित्यनुमितेर्गोत्वत्वविधेयकत्वासंभवात् गोविधे द्र
यकत्वमेवेतितदनुरोधादवश्यंधर्मिरोधव्यापकत्वंवाच्यमितिभावः ननु गोः साध्यत्वेपि गोत्वे हेतुमन्निष्ठाभावप्रति
व्याप्ति योगितानवच्छेदकमित्याकारकधियोऽनुमितिहेतुत्वात्तत्र च धर्मितावच्छेदकविधेयैव गोत्वत्वग्रहस्यापेक्षिततत्वा
त्तद्ग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह हेत्वादीति · आदिनापक्षधर्मतापरिग्रहः तथा च गवेतरावृत्तित्वरूप
वच्छेदकता व्याप्तेः साध्यव्यापकतांशे हेतुधर्मितावच्छेदकतयोर्यास्यतिधीर्व्यपितोहिशिहस्ययत्रनपक्षधर्मताधीस्तत्रैवायंगोरि एम०
त्यनुमितेर्गोविधेयकत्वमावश्यकमितितदनुरोधेनैवतादात्म्येनव्यापकत्वंवाच्यमित्याशयः । यत्तुशुद्धगोत्वावच्छिन्न २२

४ न्‌ अन्यथा ४

विधेयकानुमितिंप्रतिनिरवच्छिन्नगोत्वनिष्ठविशेष्यताकभेवप्रतियोगिज्ञानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहेपि
गोत्वेसास्नादिव्यापकतावच्छेदकत्वग्रहसंभवाद्गोसाध्यकानुमितेर्नानुपपत्तिः अभावलौकिकप्रत्यक्षएवाधिकरण
तावच्छेदकरूपेणोपस्थितेर्हेतुत्वादितिमतं तत्तुच्छं व्यभिचारज्ञानप्रतिबध्यतया तादृशव्यापकताग्रहस्यानुमित्य
हेतुत्वात्तुल्ययुक्त्या [redacted] शुद्धगोत्वविधेयकानुमितिंप्रतिनिरवच्छिन्नगोत्वविशेष्यताकस्यप्रतियोग्यनधिकरणहेतुम
त्त्वाभावप्रतियोगित्वज्ञानस्यहेतुत्वाद्यगोरित्यनुमितेर्गोत्वत्वाद्यनुपस्थितावपि गोत्वरूपधर्मसाध्यकत्वस्यदुर्वा
रतापत्तेरितिदिक्‌॥ प्रांचस्तु गोतादात्म्यस्यसास्नाव्यापकत्वग्रहादेवगोस्तादात्म्येनसिद्धिसंभवान्नतदनुरोधेनगोस्ता
दात्म्येनव्यापकत्वस्वीकारोयुक्तः संबंधगतव्यापकत्वग्रहादेवसंबंधिनोऽनुमितेर्मिश्रादिसंमतत्वात्तदुक्तंगोत्वत्वा
द्यग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामित्यर्थः इत्यप्याहुस्तच्चेत्यं गौरितिसिध्यतीतिपरेणान्वयः गोव्यतिरेका
दितितादात्म्येनेत्यनुषज्यते एवं चेति सामानाधिकरण्यादौ संबंधित्वनिवेशेचेत्यर्थः। संयोगत्वेन संयोगमात्रस्यप्रति
योगितावच्छेदकसंबंधत्वेतस्यनियामकसंयोगस्यापितत्वंसर्वसिद्धमतोमात्रपदं संबंधरूपत्वेति अन्यथा तादृश

३ गोत्वत्वाद्यग्रहदशायामित्यस्य गोतत्वेनाग्रहेयस्मादितिव्युत्पत्त्यागोत्वस्यबाधनिश्चयदशायामित्यर्थः तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं

कार्यइत्यादिवदंति ३

२२ संबंधावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वादिव्यापकत्वं दुर्घटमेव स्यादिति भावः। तादृशसंबंध
स्यप्रतियोगितानवच्छेदकत्वेपि द्वितीयकल्पानुसारेण व्यापकत्वं संपादयति· साध्यतावच्छेदकसंबंधेनेति· तथा च सं
बंधांतरावच्छिन्नघटाद्यभावमादाय एव लक्षणसमन्वय इति भावः। द्रव्यत्वस्य गगनासंयुक्तविभ्वंतरे तु व्यभिचारित्वादु
त्वतस्मादिह पृथिवीत्वादीति· व्यापकत्वमपीति· गगनादेरिति पूर्वेणान्वयः। नन्वेवं निरुक्तव्याप्तिज्ञानादृते गगनवानि
त्यनुमितिः प्रमा स्यात् तस्या हृ सिद्धिरपीति· तथैव वृत्तिनियामकसंयोगेनैव· तथा च तादृशसंबंधेन गगनानुमितेः प्र
मात्वमिष्टमेवेति भावः। तेनो संबंधित्वादिति· येन संबंधेन साध्यसामानाधिकरण्यपरामर्शो भासते तेनैव संबंधेन सा
ध्यानुमितेः फलत्वादिति भावः। सामानाधिकरण्यघटितो हेतुत्वस्य तदंशे संबंधविशेषनिवेशस्य वानंगीकारमते प्या
ह अव्यापकत्वाच्चेति· तेनेत्यनुषज्यते· तथा च यादृशसंबंधेन साध्यस्य हेतुव्यापकत्वं गृह्यते तेनैव संबंधेन साध्यसिद्धिः
फलं न तु तेन वृत्तिनियामकसंबंधेन व्यापकत्वासंभवादेव न तेन साध्यस्य प्रमानुमितिरिति भावः। ननु वृत्तिनियामक राम॰
संयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारं तादृशसंबंधेन गगनसंबंधप्रसिद्ध्या गगनाभावस्य प्रतियोगि २२

व्यधिकरणत्वाभावान्नादृशाभावांतरप्रतियोगित्वस्य च गगनादावसत्वादत आह व्यक्तीत्यादि · इदं वृत्तिनियामकसंबंधेन गग
प्रतियोगिर नादेरव्यापकत्वं तथा च निरुक्तप्रतियोगिकत्वेत्यादिना वक्ष्यमाणप्रतियोगिवैयधिकरण्यं वृत्तिनियामकसंबंधेन गगनाभा
पि वे दुर्घटमस्तीति भावः। कालिकसंबंधेन गोत्वादौ साध्ये घटादिकालोपाधिमात्रवृत्ति घटत्वादिहेतौ नाव्याप्तिः भिन्नकालीन
तत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव घटादौ प्रतियोगिवैयधिकरण्यसंभवादत उक्तं अन्यद्रव्यातिरिक्तेति · पृथिव्यादिचतुष्टया
तु तिरिक्तेत्यर्थः गगनादेः कालत्वविरहादेवमुदासादिति ध्येयं।। कर्मात्मकत्वं उ कालस्यापि भिन्नकालीनतत्तद्व्यक्तित्वाव
च्छिन्नाभावप्रतियोग्यनधिकरणत्वप्रसिध्या तन्मात्रवृत्तिस्पंदत्वादिहेतौ नाव्याप्तिरत उक्तं महाद्रव्यपदं तथाविधकालत्वाप
वप्युक्तदिशा नाव्याप्तिरतो मात्रपदं तादृशधर्मस्य महाकालत्वादेः समवायादिना व्यापकत्वं संयोगाद्यव्याप्यवृत्तेः स्तु घटम
ये त उक्तं विशेषणतेति · कालिकविशेषणतेत्यर्थः व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसं
बंधावच्छिन्नव्यापकत्वं संभवत्यत उक्तं अव्याप्यवृत्तीति · तादृशसाध्यं च घटादिकं द्रव्यत्वादिकं च तद्धेतोरपि कालस्य तदनधि
करणदिशावच्छेदेन कालिकसंबंधावच्छिन्नतदभाववत्वात् · नन्वेवं विशेषावाच्यत्वादिः तदनधिकरणदेशाप्रसिध्यात द

महाकालेऽप् दैशिकविशेषणतया

२४ घ वच्छेदेन कालिकसंबंधावच्छिन्नवाच्यत्वाभावस्य कालेऽसंभवादिति भावः। तस्मादिति। तथा च कालो घटवान्महाकालत्वा
दित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः। प्रथमविवक्षानुसारेणादोषं संगमयति। स्वावच्छेदकेति। प्रतियोगितावच्छेद
कसंबंधेनेत्यर्थः। काले महाकालत्वतत्संबंधावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबंधावच्छिन्नत्वस्यासंभवादित्यर्थो
२५ ऽन्वयः। द्वितीयविवक्षानुसारेणाह तेन संबंधेनेति। साध्यतावच्छेदकीभूतकालिकसंबंधेनेत्यर्थः। ननु महाकालान्यत्ववि
घ शिष्टघटाभाव एव प्रतियोगिव्यधिकरणः सुलभः न चात्र विशेषणताविशेषणादे[illegible]ने [illegible] महाकालनिरूपितविशेषण
तायाः एव विवक्षितत्वात् एतादृशसंबंधेन निरुक्तप्रतियोगिव्यधिकरणप्रसिद्धेरुक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभ
मात्र वादिति वाच्यं तथा सति कालवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकं तस्मादित्यस्यैव सम्यक्त्वेऽष्टद्रव्यातिरिक्ते त्या
द्यभिधानस्य संदर्भविरोधापत्तेः स्वरूपसंबंधेन गगनादेर्वृत्तिमत्त्वे चित्यग्रिमग्रंथविरोधप्रसंगाच्च। महाकालीयविशेष
णतया गगनादेर्वृत्तिमत्त्वेपि तादृशसंबंधसामान्ये महाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिकत्वविरहात्तादृश ता रा म०
घटत्वावच्छिन्नाभावस्य निरुक्तस्य प्रतियोगिव्यधिकरणत्वसंभवेन पूर्वमतस्यैव सम्यक्त्वादिति चेन्न। इदानीं महाका २४

लान्यत्वविशिष्टो घटः कालोयं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छे-
देन महाकालान्यत्वविशिष्टघटवत्वात् अन्यथोक्तप्रतीत्या खंडकाल एव विशिष्टघटवत्वावगाहने वस्तुमात्रस्यैव महाकालेऽ-
सत्वप्रसंगात् इदानीं तदानीमित्यादिप्रतीतिव्यतिरेके च महाकालविषयिण्याः प्रतीतेः स्वरसतः कुत्राप्यसत्वात् न चैवं
खंडकालस्याधिकरणत्वे मानाभावः पटध्वंसविशिष्टः कालः पटवदन्य इत्यादिप्रतीतेः प्रमाणत्वानुरोधेनैव खंडकालस्य तत्
२। यात्वादिति सिद्धांतानुसारी पंथाः ॥ परे तु महानसीयवह्नित्वेन वह्निघटोभयत्वेन वान्यावच्छिन्नप्रतियोगिताकस्य धूमसमा-
नाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वेप्यस्तीत्यव्याप्तिभियाऽवश्यं साध्यतावच्छेदकाघटको यः साध्यवृत्ति-
धर्मः तदनवच्छिन्नैव हेतुसमानाधिकरणाभावस्य प्रतियोगिता निवेशनीया प्रत्येकमुभयत्र पर्याप्तिसंबंधेनासतो धर्मस्य
तादृशसंबंधेनोभयवृत्तित्वासंभवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्य निवेशायोगात्
एवं च प्रकृते महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य प्रतियोगितायाः साध्यतावच्छेदकाघटकेन महाकालान्यत्व-
वैशिष्ट्यरूपसाध्यनिष्ठधर्मेणावच्छिन्नत्वात् तादृशप्रतियोगिताकाभावमादाय न प्रतियोग्यव्यधिकरणाभावस्याप्रसिद्धिसंभा-

२५ वनापीति प्राहुः तच्चिंत्यं प्रमेयवान् वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाप्रसिध्याऽव्याप्तिप्रसं
२५ गात् वस्तुतो यादृशप्रतियोगितावच्छेदकावच्छिन्नस्यानधिकरणत्वं हेतुमतः तत्त्वावच्छेदकवैशिष्ट्यमेव सूपं साध्यतावच्छेद
कताघटकसंबंधेनैव वाच्यं अन्यथा तत्साध्यः पिंडस्यापि कालिकसंबंधेन धूमत्वविशिष्टं यद्वन्ह्यादिकं संयोगेन तदधिकर
णतया धूमवान् वन्हेरित्यादावतिव्याप्त्यापत्तेः इत्थं च यत्र समवायेन घटत्वादिविशिष्टस्य कालिकसंबंधेन साध्यता तत्र म
हाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नत्वमप्रसि
द्धं स्वरूपसमवायाभ्यामेव तत्र तथात्वात् विशिष्टनिरूपितसमवायानभ्युपगमात् अतस्तादृशाभावमादाय न प्रसिद्धिसं
भव इति ध्येयं न केचित्तु साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वाद्विशिष्टसाध्यकस्थले एव यादृशप्रतियोगितावच्छेदकावच्छिन्ना
नधिकरणत्वं हेतुमतः इत्यादिवक्तव्यं अविशिष्टसाध्यकस्थले तु यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतः इत्येव ला
घवाद्वाच्यं तथा च शुद्धघटस्य साध्यतायां महाकालान्यत्वविशिष्टघटस्याभावोऽपि प्रतियोगिसमानाधिकरण एव प्रतियोगि राम०
ताच प्रतियोगितावच्छेदकधर्मस्वरूपैव लाघवान्न तु प्रतियोगिस्वरूपा तथा सति अनेकत्वेन गौरवात् अतो नैकप्रतियोग्यनधिकर २५

न्या

रणता मादा पसंयोगे पतत्वादिना साध्यव्याप्तिरित्याह नन्विति । कालो घटवान् महाकालत्वादित्यादावव्याप्तिवारणार्थमेव विशिष्टसाध्य
कत्वस्थले पि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्याकिंचित्करत्वादिति ॥ सार्वभौमम
तमाशंक्य निराचष्टे नचेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति साध्यतावच्छेदकसंबंधेनेत्यर्थः इदं चाग्रे ज्ञीत्यस्य प्रतियो
गिवृत्त्यन्तेन तादृशपदस्य प्रतियोगितावच्छेदकसंबंधपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छेदकसंबंधावच्छिन्नत्वाद्यनुक्त्या ता
दृशसंबंधेनेत्यस्य फलमाह सत्त्वादीति । विषयतायावृत्त्यनियामकत्वे सत्त्ववति घटादौ ज्ञानाभावस्य सहजत एव प्रतियो
गिवैयधिकरण्यसंभवत्वात् संयोगसामान्यस्य चेति । नातिप्रसंग इति । ज्ञानवान् संयोगत्वान्वा सत्त्वादित्यादौ नातिप्रसंग इत्य
र्थः सत्तावद्भिन्नत्वसामान्याभावस्य संयोगादावभावात् उक्तातिव्याप्तिवारणमेव यत्किंचिदित्यस्यापि प्रयोजनमित्यवधे
यं । प्रतियोगितावच्छेदकविशिष्टेत्यस्य फलमाह । भूतत्वेति स्वयं मनसः संबन्नात् भूतत्वमूर्तत्वोभयसाध्यकस्थले चस्पस
द्धेतुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टोतद्रूपं मनेगुणयोः क्रमेणान्वितौ विशिष्टस्यानतिरिक्तत्वं विशिष्टधर्माव इदं च
च्छिन्नाधेयत्वस्य चातिरिक्तत्वमित्यभ्युपेत्य भूत्यथोभयत्वस्य एक विशिष्टापरत्वे भूतत्वमूर्तत्वोभयगुणकर्मान्यत्वविशि रूपत्वे

२६ मूर्त्तत्वयोरतिरिक्ततया तयोः सद्भ्रान्त एवमनेन गुणाद्यवृत्तित्व प्रतियोगितावच्छेदकविशिष्टेत्यभिधानस्यासंगतत्वापत्तेरिति
ध्येयं॥ सामान्यपदस्य फलमाह संयोगसामान्यं त्विति। तथा च संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणायैव सामान्यपद
26 मिति भावः॥ विशिष्टस्येति। विशिष्टनिरूपिताधेयत्वस्येत्यर्थः तथा च विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरिति
भावः। ननु तादृशसंबंधावच्छिन्नयत्किंचिद्धेत्वधिकरणवृत्तितानवच्छेदकप्रतियोगितावच्छेदककत्वसामान्यकांतेन वि
वक्षितमतो नोक्तदोष इत्यत आह समवायेनेति। ननु समवायेन जातेर्व्याप्यवृत्तित्वान्न साध्यके प्रतियोगिवैयधिकरण्य
मेव न देयं। देयं चा व्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तौ साध्यतावच्छेदके व्याप्यवृत्तिता न वक्तव्यं च विशेषणमतो न तत्र तल्ल छेद
लक्षणे ऽस्यैव जातिव्याप्तिरस्त्वत आह संयोगादीति अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे स्वप्रतियोगिताव
च्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववद्धेत्वधिकरणायत्किंचिद्वृत्तित्वसामान्यकत्वस्य विवक्ष
न्नोरू णां कोपि दोष इत्यस्मद्गुरुचरणाः। न व्यासज्य साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणयावद्धेत्वधिकरणाकोयोभयस्तदन्य णाम०
त्वं प्रतियोगिवैयधिकरण्यं वाच्यं मतो गगनाभावमादायैव प्रसिद्धेर्न कोपि दोषः। न चैवं पर्याप्तिसंबंधेन यद्धर्मावच्छिन्नानधिक २६

रणं हेत्वधिकरणं तत्तत्संबंधान्यसाध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघव [redacted] वाद्व्याप्तिरस्तु
तथा च घटवान्महाकालत्वादित्यादौ समवायेन घटाद्यभावो ऽपि प्रतियोगिव्यधिकरणः संभवतीति वाच्यं। घटवृत्तित्वविशि
ष्टद्रव्यत्ववान् घटत्वादित्यादावव्याप्तिः केनापि संबंधेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासंभवादिति प्राहुः।
त्र ताहृशसंबंधसामान्य इत्यस्य पूर्ववदर्थो बोध्यः कुचित्साध्यतावच्छेदकसंबंधवृत्त्येव पाठः विवक्षितत्वादिति ॥ अभावांतमू सामान्य
लग्रंथेनेत्यादिः तथा च साध्यतावच्छेदकसंबंधसामान्ये याहृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणी
भूतयत्किंचिद्धर्म्यनुयोगिकत्वसामान्योभया [redacted] भावस्ताहृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसा
मानाधिकरण्यं व्याप्तिरित्यर्थः संबंधसामान्ये इत्युक्तौ कालिकसंबंधे धूमप्रतियोगिकत्वायःपिंडानुयोगिकत्वोभयसत्वाद्धू
मवान्वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेदकेति॥ समवायिनः संयोगेन साध्यतायां जातिमत्वादावतिव्याप्तिः साध्यतावच्छे
दकीभूतसमवायात्मकधर्मे समवायावच्छिन्नप्रतियोगिकत्वगुणानुयोगिकत्वोभयसत्वेन साध्याभावस्यालक्षणाघटकत्वाद
फलं तः संबंधपदं ॥ यद्धर्मावच्छिन्नसंसर्गताकप्रकृतसाध्यानुमितिः तद्धर्मावच्छिन्नसामान्य इति तु फलितार्थः घ संयोगे पर्वतात्र से टीय

२७ 27 योगेवाहेतुमन्महानसानुयोगिकत्ववन्हिप्रतियोगिकत्वोभयाभावसत्वाद्वन्हिमान्धूमादित्यादावव्याप्तिरतः प्रथमं सामान्य
यद्वं तथा च महानसीयवन्हिसंयोग एव तद्वृत्त्योभयाभावविरहान्नाव्याप्तिः संयोगसामान्यस्यैव च हेतुमद्योगोलकानुयोगिकत्व
धूमत्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्वाद्धूमवान्वन्हेरित्यादौ नातिव्याप्तिः संयोगसामान्यस्यैव समवायनिष्ठस्य पर्वतानु
योगिकत्वस्य वन्हित्वावच्छिन्नप्रतियोगिकत्वस्य च द्वयोरभावसत्वान्नैव वाव्याप्तिरतः सामान्योभयेति। तादृशोभयाभावश्च स्व
रूपसंबंधेन बोध्यः तेन समवायादिना तदुभयाभावस्य संबंधमात्रे सत्वेपि सद्धेतौ नाव्याप्तिः। एतद्घटवान्कालांतरीयघटत्वादि ततृ
त्यादौ एतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसिद्धेरभावांतरमादायातिव्याप्तिः गगनप्रतियोगिकत्व
विशिष्टमहाकालानुयोगिकत्वाप्रसिध्या गगनाभावमादाय प्रकृताव्याप्तिवारणासंभवश्च स्यादतो निरुक्तप्रतियोगिकत्व
विशिष्टयत्किंचिद्धेत्वधिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्याभाव उक्तः। न चैवं तादृशप्रतियोगितावच्छे
दकावच्छिन्नप्रतियोगिकत्वविशिष्टसंबंधसामान्ये हेत्वधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वविशिष्टसाध्यतावच्छेदकसंबं रम०
धत्वस्य तथाविधसंबंधसामान्ये वा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य व्यतिरेकः तादृशप्रतियोगितान २७

वछेदकत्वमेव साध्यतावछेदकस्य कथं नोक्तमिति वाच्यं· द्रव्यवान्प्रमेयत्वादित्यादौ संयोगेन साध्यतायामतिव्याप्त्या
यत्नेः प्रमेयानुयोगिकसंयोगसामान्यस्य द्रव्यत्वावछिन्नप्रतियोगिकत्वेन साध्याभावस्य लक्षणाघटकत्वादिति ध्येयं·
एवं च कालिकसंबंधसामान्ये महाकालानुयोगिकत्वसत्वेपि गगनप्रतियोगिकत्वविरहाद्गगनाभाव एव घटवान्महाका
लत्वादित्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इति भावः। ननु हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वं यदि तद्वृत्ति
त्वं तदा धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमप्रतियोगिकस्यापि संयोगस्य कालिकसंबंधेनायोगोलकवृत्तित्वात् यदि च साध्य
तावछेदकसंबंधस्य संसर्गतानियामको यः संबंधस्तेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं तदा संयोगेन द्रव्यस्य साध्य
तायां द्रव्यं जात्यन्यतरत्वादावतिव्याप्तिः जातौ समवायेन वृत्त्यप्रसिद्धेः न च साध्यतावछेदकसंबंधावछिन्नाधिकरणतासा
मान्ये निरुक्तोभयाभाववत्वं विवक्षितं तत्र च हेत्वधिकरणवृत्तित्वस्वरूपसंबंधेनैव वाच्यमिति सांप्रतं· अत एवेत्यादिवक्ष्य
माणग्रंथासंगतिप्रसंगात् समवायस्यैकत्वेपि तदवछिन्नद्रव्यत्वाधिकरणतायां निरुक्तोभयाभावसत्वेन द्रव्यं जातेरित्यादा
वतिव्याप्त्यभावादिति केचित्। संयोगः पर्वतवन्ह्योः संबंधः न तु वन्हेः पर्वतस्येत्यादिप्रतीत्या हि किंचिदनुयोगिकः किंचित्प्रतियो

प्रतियोगि२

२८ 28 गिकसंबंधत्वमनुभवसिद्धं कुत्रचिदेव संयोगादौ नतु सर्वत्र तत्त्व स्वरूपसंबंधविशेषोऽतिरिक्तो वेत्यन्यदेतत् । तथाच साध्यताव
च्छेदकसंबंधसामान्ये निरूक्तप्रतियोगिकसंबंधत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसंबंधत्वोभयाभावस्यावि
वक्षणाद्धूमसंयोगस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नातिप्रसंगः तत्र यथार्थविशिष्टधीनियामकस्यैव तदनु
योगिकसंबंधत्वात् । एतेन वह्निमान्वह्निरूपादित्यादावतिव्याप्तिः पर्वतवह्निसंयोग एव वह्निप्रतियोगिकत्वहेत्वधिक
रणीभूतवह्न्यनुयोगिकत्वोभयाभावविरहेण वह्निसामान्याभावस्य लक्षणाघटकत्वादित्यपास्तं । पर्वतवह्निसंयोगस्य
हेतुमद्वह्निवृत्तित्वेपि वह्न्यनुयोगिकसंबंधत्वविरहेण तत्र तादृशोभयाभावसत्त्वात् इदंत्ववधातव्यं । यत्रैकसंयोगव्य
क्त्यापन्नयोर्द्वयोः परस्परं विशिष्टधीः प्रमा तत्र तयोरेकस्मिन्संयोगेन साध्ये तदीयस्यादौ व्यभिचारिण्यतिव्याप्तिः त
दुभयसंयोगस्य निरुक्तोभयाभावविरहादिति । यत्किंचिदित्यस्य फलमाह धूमसंयोगइति । अन्यथा वह्न्यधिकरणम
होनसानुयोगिकत्वधूमप्रतियोगिकत्वोभयस्यैव धूमसंयोगस्यत्वेन धूमाभावस्य प्रतियोगिव्यधिकरणाभावाद्धू राम०
मवान्वह्नेरित्यत्रातिप्रसंगस्यादिति भावः । षष्ठ्यंतत्रयविरहादित्यन्वयिः निरूक्तपदस्य घटकत्वतः फलमाह चैत्रान्यत्वे २८

ति॰ निरुक्तपदानुक्तौ चैत्रान्यत्वविशिष्टेन दण्डेन वानेन दण्डादित्यत्र चैत्रवृत्तेन दण्डसंयोगएव चैत्रान्यत्वविशिष्टेन दण्डाभावप्रति
२ प्रतियोगिक योगित्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभाववविरहात्तादृशदण्डाभावस्य लक्षणघटकतयातिव्याप्तिः स्यात्॰
तदुपादाने तु चैत्रान्यत्वविशिष्टेन दण्डत्वावच्छिन्नप्रतियोगिकत्वस्याभावादेव तत्रोभयाभावसंभवदिति नातिव्याप्तिरिति भा
च वः। यदि प्रतियोगितावच्छेदकाश्रयं नानैव न त्वेकेति मतं तन्न दा चैत्रान्यत्वविशिष्टदण्डत्वावच्छिन्नं यत् चैत्रावृत्तिदण्डनिष्ठप्रतियो
गित्वं तदाश्रयप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावस्य संयोगसामान्यएव सत्त्वान्निरुक्तपदं वि
नापि नातिव्याप्तिः संभवतीति तन्मते साधारणेपनातिव्याप्तिरक्षार्थमुक्तमेतदिति॰ दण्डसामान्यस्य हेतुत्वे एतद्दण्डप्रतियो
स्थ गिकसंयोगसामान्यएव दण्डांतराधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वाभावादेवोभयाभावसत्त्वादतिव्याप्तिविरहः स्याद
तो हेतावेतदिति॰ संयोगेन साध्यतायां निरुक्तपदव्यावृत्तिमुक्त्वा समवायेन साध्यतायां तामाह गुणकर्मा न्येति इदं च सम न्य
वायस्य नानात्वमभिप्रेत्य तस्यैकत्वे तु तत्र गुणानुयोगिकत्वविशिष्टसत्ताप्रतियोगिकत्वोभयसत्त्वे नातिव्याप्तितादवस्थ्या
त्। साध्यतावच्छेदकसंबंधतासामान्ये तादृशोभयाभावघटितमेवेदं लक्षणमित्यभिप्रायेणावेदं बोध्यं॥ यद्यपि योदृशप्र

२९ तियोगितावच्छेदकावच्छिन्नेत्याद्युक्तौ वह्निधूमोभयवान्धूमादित्यत्राव्याप्तिः संयोगसामान्येनैव वह्निधूमोभयत्वावच्छिन्न
२५ प्रतियोगिकत्वधूमाधिकरणपर्वतानुयोगिकत्वोभयाभाववत्त्वात्तन्न च निरुक्तप्रतियोगितावच्छेदकावच्छिन्नवत्त्वाप्रमायां
सांसर्गिकविषयत्वमेव निरुक्तप्रतियोगिप्रतियोगिकत्वं वक्तव्यं तच्च पर्वते वह्निधूमयोः प्रत्येकसंयोगस्याप्युक्तौ तेनाव्या
वा प्तिः अन्यथा पर्वतः संयोगेन वह्निधूमोभयवानित्यादिप्रमाया दुर्धरत्वापत्तेरिति वाच्यं तथा सत्यग्रे तस्यैवेत्यादिना वक्ष्य
माणाया वह्निधूमोभयवान्वह्नेरित्यत्राव्याप्तेरसंगत्यापत्तेः वह्निधूमोभयवत्तौ नियामकसंयोगमात्रस्यैव द्वित्वाधिक धूमा
रणीभूतायोगोलकानुयोगिकत्वाभावेन वह्निधूमोभयत्वावच्छिन्नाभाववन्महाह्रदे वातिव्याप्त्यसंभवात् तथापि साध्य
साधनभेदेन व्याप्तिभेदात्तत्तत्सत्त्वप्रवृत्तिधर्मेण साध्यतायां निरुक्तपदमपहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्व
घटितोभयाभावस्यैव प्रवेशान्नोक्तस्थलेऽव्याप्तिः न चैवमुभयत्वेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः तद्दोषस्यात्र
एवेत्यादिना वह्निधूमोभयवान्वह्नेरित्यादौ ग्रन्थकृतैवाग्रे वक्ष्यमाणत्वादिति । वस्तुतः संबंध [redacted] स्यैकप्रतियोगिकाप राम०
रानुयोगिकत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वाप्रसिद्ध्यैव तदुभयत्वावच्छिन्नाभावस्य लक्षणा २८

ग्रे घटकत्वान्नाव्याप्तिरत एवं वन्हिधूमोभयवान्वन्हेरित्यादावतिव्याप्तिः पूर्वग्रंथस्य तेन न च वन्हिधूमोभयत्वावच्छिन्नप्रकारित्वा
दावेव तादृशोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वप्रसिद्धिसंभवः प्राचां मते प्रकारित्वादेः संसर्गत्वाभावात् - विशिष्टधीनि
था यामकस्यैव तत्त्वादिति ध्येयं॥ नचैवमपि घटवन्निरूपज्ञानेत्वादित्यत्राव्याप्तिः विषयितासंबंधे गगनीयत्वनिरूपज्ञानानुयो
गिकत्वोभयसत्वेन गगनाभावमादायापि प्रसिध्यसंभवादिति वाच्यं · तादृशसंबंधेन घटादेः पवृत्तितया तत्साध्यके प्रतियो व्यो
त्वात्वायादि गिवैयधिकरण्यस्यैवाप्रवेशादिति ध्येयं॥ अत्र ब्रूमः साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरू
दभाव पसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्वं हेतुमन्नस्ति तादृशप्रतियोगितानवच्छेदकत्वस्य दभाव
साध्यतावच्छेदके विवक्षणे नैव सामंजस्यं निरुक्तप्रतियोगिकेत्यादिरवश्यं प्रसिद्धिर्विफला · कालो घटवान्महाकालत्वादि
त्यादौ कालिकसंबंधावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसंबंधेन पटत्वाद्यवच्छिन्नाधिकरणत्वसामान्याभावस्यैव हे
तुमति सत्वेन पटत्वाद्यवच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य सुलभत्वा[illegible]तु[illegible]यं॥ एवं यादृशप्रतियोगितावे
च्छेदकावच्छिन्नप्रतियोगिताकसंबंधसामान्ये साध्यतावच्छेदकसंबंधत्वं हेत्वधिकरणीभूत यत्किंचिद्व्यक्त्यनुयोगिकत्वोभया संबंध

३० भावस्तादृशप्रतियोगिता कथं नोक्तेति चिंतनीयं॥ कालस्य जगदाधारत्वप्रवादमनुसृत्याह स्वरूपसंबंधेनेति· कालिकवि
शेषणतयेत्यर्थः गगनादेरवृत्तित्वप्रवादस्तु संयोगसमवायपरः तथा चोक्तप्रनोत्यापि गगनाभावो न प्रतियोगिव्यधिक
रण इति घटवान्महाकालत्वादित्यादावव्याप्तिस्तदवस्थैवेति भावः।· निरुक्तेति· प्रतियोगितावच्छेदकसंबंधेन यादृशप्र
तियोगितावच्छेदकावच्छिन्नासंबंधित्वं हेतुमतस्तादृशप्रतियोगिता सामान्यमित्यर्थः तथा च संयोगादिना घटाद्यभावमादा
यैव घटवान्महाकालत्वादित्यत्र संगतिः घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वसंयोगसंबंधावच्छिन्नत्वोभयाभावस
त्वेन धूमत्वादिनो वन्ह्यादिव्यापकत्वापत्तिवारणाय सामान्येति· तथा च धूमनिष्ठतादृशप्रतियोगितायामेव तदुभयसत्वाददोषः
यत्संबंधेति· समवायेन संयोगेन साध्यतायां घटत्वादिहेतावव्याप्तिः साधनवन्निष्ठस्य समवायेन संयोगिसामान्याभावस्यप्र
तियोगितायां संयोगसमवायोभयावच्छिन्नतासत्वादतो धर्मिसंबंधपदयोरुपादानं· तथा च तदभावप्रतियोगितायां धर्मविधया स
अत्र च मवायेन संबंधविधया संयोगेन चावच्छेदकत्वाभावान्नाव्याप्तिरिति भावः। क्वचिद्यादृशसंबंधावच्छिन्नेत्यपि दृष्टव्यं· शब्दे कयस्या राम०
नुपादेयत्वात्· तेन धूमवति तत्र तत्संयोगसंबंधेन वन्हिसामान्याभावसत्वेपि नाव्याप्तिः तत्र संयोगावच्छिन्नप्रतियोगितायाः ३०

त्वस्य संबंधविधया वच्छेदकतावच्छेदकत्वैनै १

संयोगसामान्यानवच्छिन्नत्वात्. संयोगा [redacted] त्वस्य तादृशसंबंधता
वच्छेदकत्वस्य छत्त्वस्यैव तथात्वात्. एवं यद्धर्मावच्छिन्नेत्यत्रापि कचिद्यादृशधर्मावच्छिन्नेति बोध्यं. तेन दंडि मान् दंडि संयोगादित्या
दौ तादृशप्रतियोगितायां तत्तद्दंडावच्छेघत्वसंयोगावच्छेघत्वोभयवत्वेपि नाव्याप्तिः प्रमेयत्वावच्छेघत्वविशिष्टस्वरूपसंबंधावच्छे
घत्वाप्रसिद्ध्याप्रमेयवान्वाच्यत्वादित्यादावव्याप्तिरितीविशिष्टाभावमपहायतादृशोभयाभावउक्तः न च निरुक्तप्रतियोग्यनधि
करणहेतुमन्निष्ठाभावीययद्धर्मावच्छिन्नप्रतियोगितासामान्येयत्संबंधावच्छिन्नत्वाभावस्तत्संबंधेन तद्धर्मावच्छिन्नंव्यापकमित्य
स्तु धर्मांतरावच्छिन्नाभावाप्रवेशेन लाघवादिति वाच्यं. घटत्वविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेः तादृशद्रव्यत्वभे
दमादाय कथंचिन्नत्रलक्षणासमन्वयेपि पदधित्वविशिष्टप्रमेयवान्पूर्त्तदधित्वादित्यत्राव्याप्तिः केनापि संबंधेन हेतुमतः साध्य स्थ
तावच्छेदकावच्छिन्नानधिकरणत्वासंभवात्. तत्रापि द्यंत्तस्तुयोगिकसमवायादिसंबंधेन हेतुमतः प्रकृतसाध्यानधिकरणत्वेत
उक्तक्रमेणापि व्यापकत्वस्तु त्वमिति तुविभावनीयं तेन संबंधेनेति. न चैवं संयोगेनापि रूपस्पेष्टथिवीत्वव्यापकत्वापत्तिः तेन
संबंधेन रूपाभावप्रतियोग्यधिकरणाप्रसिद्धेरिति वाच्यं. तथात्वेपि तेन संबंधेन सामानाधिकरण्याप्रसिद्धैवव्याप्तिलक्षणाति

तावच्छेदक१

३१ व्याप्तिविरहात्। यद्धर्मेत्यत्र धर्मस्य साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकत्वेन विशेषणीयत्वाद्वा। नच वृत्त्यनि
यामकसंबंधेन साध्यतायाम् व्याप्तिः तादृशसंबंधस्यापि प्रतियोगितावच्छेदकत्वपक्ष एवैतन्निरुक्तत्वाददोषः। निरुक्तप्रतियोगिता
सामान्ये यत्संबंधातिरिक्तसंबंधानवच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु न युक्तं
वृत्त्यनियामकसंबंधेन साध्यतायां व्यभिचारिण्यतिव्याप्त्यापत्तेः यद्वा स्वावच्छेदकताघटकसंबंधेन यादृशप्रतियोगितावच्छेदका
नधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्वयत्संबंधावच्छिन्नावच्छेदकताकत्वोभयाभा
स्य वस्तेन संबंधेन तद्धर्मावच्छिन्नं व्यापकत्वं विवक्षितं वृत्त्यनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वेपि प्रतियोगितावच्छेदक
ताघटकसंबंधत्वं सर्वसंमतमेव। चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसंबंधेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादा
वन्वयदर्शनात् व्यभिचारिणि तु साध्यवत्सामान्याभावप्रतियोगितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति तु नव्याः। न
नु व्याप्यवृत्तिसाध्यकस्थले उक्तक्रमेणैव व्यापकत्वं निर्वाच्यं अन्यथा दंडिमानित्यादौ दंडित्वादिप्रकारेणाव्यापकत्वानुपपत्तेः राम०
तथा च प्रमेयवान् घटत्वादित्यादावव्याप्तिः प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्धेः न च प्रकारित्वादौ तत्प्रसिद्धिः प्रतियोगितानिष्ठायाः ३१

वावच्छेद्यतायाः प्रकृते तन्निवेशनीयत्वात् । अन्यथा प्रकारित्वप्रतियोगित्वसाधारणैकावच्छेदकत्वविरहेणाव्यभिचारिणापत्तिव्याप्याय
त्वेऽपि विशेष्यितया च प्रमेयत्वविशिष्टस्य ज्ञानादेरभावप्रतियोगितायां प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्ध्यापि स्वस्य संबंधेन साध्य
तावच्छेदकतावच्छेदकेन तदवच्छिन्नत्वस्याप्रसिद्धेरत आह समवायेनेति । ननु स्वरूपसंबंधेन गगनादेर्वृत्तिमत्त्वेऽपि प्रकृतसा
ध्यीयसाध्यतावच्छेदकसंबंधसामान्यतादृशोभयाभावविवक्षयैव सामञ्जस्ये कृतं विवक्षान्तरेण । घटवान् महाकालत्वादि सर्व
तादृश त्यत्र घटीयविशेषणतायां पदत्वावच्छिन्नप्रतियोगिकत्वविरहेण पराभावस्यैव प्रतियोगिवैयधिकरण्यासंभवात् । कालत्वः
प्रमेयवान् महाकालत्वादित्यत्र च कालिकसंबंधेन प्रमेयसामान्यस्याव्याप्यवृत्तितया तत्र प्रतियोगिवैयधिकरण्यस्यैवानु
पादेयत्वेन निर्दोषत्वादतः पूर्वकल्पे दोषान्तरमाह अत एवेति । यद्यपि संयोगमात्रस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वविरहाद्व
ह्निधूमोभयत्वावच्छिन्नाभावमादायैव नातिव्याप्तिसंभावना तथापि वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य वह्नित्वावच्छिन्नप्र
तियोगिकत्वविरहेऽपि समवायस्योभयवत्त्वेन द्रव्यं ज्ञातेरित्यादौ नातिव्याप्तिरिति योजना विरुद्धेऽपि चेति चकारस्तु प्रामादि
क इति प्राचः । वस्तुतः संयोगस्य संबंधमात्रस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वाप्रसिद्ध्यापीत्यर्थः तथा च संबंधमात्रस्यैकप्रति
कत्वेन द्रव्यत्वप्रतियोगिकत्वगुणानुयोगिकत्वयोर्

योगिकापरानुयोगिकसंबंधत्वनियमेन वन्हिधूमोभयत्वावच्छिन्नप्रतियोगिकसंबंधस्याप्रसिध्यात्तादृशप्रतियोगित्वस्यालस क
३२ वा त्वाघटकत्वेपि वन्हिधूमोभयान्यत्वेन्हिरित्यादौ नातिव्याप्तिःप्रकारित्वादेःसंबंधत्वेमानाभावादितितुप्रागेवप्रपंचितमस्माभिः।कि
चितु·वन्हिरित्यत्रधूमादितिनातिव्याप्तिरित्यनंतरंचाव्याप्तिरपिनिर्वतिपाठं कल्पयंतोद्रव्यंज्ञानेरित्यादावतिव्याप्तिंवन्हिधूमो
भयवान्धूमादित्यत्रचाव्याप्तिमेवपूर्वलक्षणेदोषंसंगमयंति ननुस्वरूपसंबंधात्मप्रतियोगित्वस्यविशिष्टधीजनकत्वरूपसं क
बंधताघटकनियमघटितत्वात्तादात्म्याश्रयत्वमतस्त्राह प्रतियोगितेदिरितिस्त्रादिना [redacted] वच्छेदकत्वपरिग्रहः नसंबंधत्वेनेतिप्र
तियोगितात्वादिधर्मांतरप्रकारेणहेतुमन्निष्ठाभावीयत्वप्रकारेणैववातत्प्रवेशादितिभावः संयोगत्वादिनैवेति [redacted] संबंधवि
धयेत्यादिः ननुप्रतियोगितात्वमपिस्वरूपसंबंधएवेत्युक्तदोषतादवस्थ्यं किंचवृत्तनियामकसंबंधेन हेतुतावच्छेदकेनेतेन सं
बंधेनहेतुसंबंधित्वस्यावश्यंप्रवेशएवेत्यतःसंबंधत्वेननिवेशोपिनक्षतिरित्याशयेनाह दर्शितंचेतिविशेष्यत्वविशेषणत्वा
न्यविशिष्टधीविषयत्वस्यैवसंबंधतास्वरूपत्वादितिभावः भावभिन्नत्वस्याभावत्वस्यप्रवेशेतुघटत्वाभाववान्द्रव्यत्वादि रापं०
संता त्यादावतिव्याप्तिरित्याह भावत्वंचेति इदमिहत्यादिइदं चान्योन्या [redacted] संतताभावत्वयोरभावत्वगर्भतामभिमेत्यतयोस्तद् ३२

रूप२

भेतायांत्वाह तदपिवेति अभावत्वमपिवेत्यर्थः अपेक्षाबोधः अतिरिक्तविषयतापक्षस्यनैयायिकेनापिकेनचित्स्वी
कारात्तस्यदृष्टांततातत्वादीतिविषयतात्वादीत्यर्थः केचित्तुतत्वंतन्नाम्नादिनाचेदंत्वस्योपग्रहः तत्वेदंत्वयोः पदार्थांत
रत्वंविनादुर्वचत्वात्तत्रैवपर्यवसानादित्याहुः तत्वेतिप्रतियोगितात्वाधिकरणतात्वेत्यर्थः॥ इतिसिद्धांतग्रंथजागदीशी
संवत् १८६० मितिकार्तिकशुक्लषष्ठीवारसनीचरसंपूर्नकीहा ॥ ॥ ॥ ॥

इत्यनवच्छेदकमित्यत्रावच्छेदकत्वंअवच्छेदकत्वपदार्थः विशिष्टसत्तात्वसमनियतस्यसत्तात्वस्यलघुनोपिनविशिष्टाभावप्र
तियोगितावच्छेदकत्वंगुरुणादौवपिसत्तानास्तीतिप्रतीतिप्रसंगात् पृथिवीसमवेतत्वासमनियतस्यापिचसमवेतत्वस्यपृ
थिवीसमवेताभावप्रतियोगितावच्छेदकत्वंअनतिप्रसंगात् एवंघटरूपत्वस्यासमनियतमपिरूपत्वंअधिकरणासंयोगादि
संबंधावच्छिन्नघटरूपाद्यभावप्रतियोगितावच्छेदकं अतः समनैयत्यमकिंचित्करंपस्यावच्छेदकत्वस्वीकारेऽतिप्रसंगाद्यभा
वः सएवावच्छेदकइत्यभिप्रायेनाह संभवतीति अतिप्रसंगाद्यनापादकेलघौसंभवतीत्यर्थः प्रमेयधूमत्वस्यताद्दृशप्रतियो
गितावच्छेदकतापर्याप्त्यधिकरणधूमत्वानतिरेकादाह कंबुग्रीवेति नचकंबुग्रीवादिमत्वंकंबुग्रीवादिव्यक्तिरेवसाचप्रत्ये

घोग्राह्यगंधत्वस्यैवावच्छेदकत्वंबोध्यं ५ अत्र ५

३२ कं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदिकैवेति कुतः इति व्याप्तिरिति वाच्यं परंपरयासंबद्धानगतकंबुग्रीवादिमत्वजातिमत्वस्यैवसा

ध्यतावच्छेदकत्वात् तत्स्यच परंपरयावच्छेदकत्वकल्पनामपेक्ष्य लाघवेन घटत्वस्यैव साक्षात्तथात्वादिति भावः [redacted]

र्यी ननु पृथिवीत्वतेजस्त्वादिनासंकरेण घटत्वं यदि नाना तदानेकमपि घटत्वं कंबुग्रीवादिमत्वसमनियतमतत्राह

घ्राणेति घ्राणग्राह्यगुणत्वापेक्षया लाघवेन घ्राणग्राह्यगंधत्वस्यैव प्रतियोगितावच्छेदकत्वादिति भावः अन्यथा परमाणौ गंधत्वेन

न सह घ्राणग्राह्यगुणत्वस्य समनियतत्वाभावात् गंधत्वस्यैव प्रतियोगितावच्छेदकत्वादिति भावः घ्राणग्राह्यगुणत्वं घ्राणग्रा [redacted]

ह्यविशेषगुणत्वव्यापकजातिमत्वं तेन गंधत्वस्य लघोः समनैयत्येपि तात्पर्यमित्यपि कश्चित् अभिन्नाश्रितस्यैव परमेयत्वादौ स्व

रूपसंबंधात्मिकायाः इति प्रतियोगिव्यक्तिभिन्नत्वे हेतुः तत्तदभावप्रतियोगिता उभयस्वरूपायाः इति तदर्थः तत्र प्रतियोगिमात्रस्व

रूपत्वे सामान्याभावविशेषाभावयोः प्रतियोगितयोरविशेषापत्तेरिति ध्येयं धूमत्वादेरपीति तयोश्च धूमवान्वह्नेरित्यादौ [redacted] राम०

व्याप्तिलक्षणा ति व्याप्तिरिति भावः नचेति वाच्यमित्यग्रेणान्वितं तथाविधेति यत्किंचित्पदं व्याप्यवृत्तिसाध्यकहेतौ लक्षणाभिप्रा ३२

नाप्तीति तादृशप्रतियोगितायास्तत्तद्व्यक्तित्वावच्छिन्नाभाववद्वृत्तित्वमपिनेत्यर्थः तेन साध्याभावप्रतियोगिताप्रतियोगिकाभाववद्वृत्तित

याधूमत्वादेरवच्छेदकत्वाभावादतिप्रसंगसंभवात् स्वरूपसंबंधात्मिकायाः स्यात् [redacted] नवेयं पर्य्यन्त व्याप्तिमग्रंथविरोध इति ध्येयम् ४

येणतथा च तथाविधो हेतुसमानाधिकरणो यो यत्किंचिदभावस्तत्प्रतियोगितात्वावच्छिन्नाभाववद्वृत्तित्वं तत्रार्थः तथा
विधाभावीयप्रतियोगितासामान्यभूत्प्रत्वमप्रसिद्धं सर्वेषामेव वस्तूनां तादृशयावत्त्वावच्छिन्नाभावप्रतियोगितावत्त्वादत उ
क्तं यत्किंचिदिति समनियताभावयोरैक्यानुपगमाच्च घटादिसामान्याभावस्यैव घटीयादिसंयोगसंबंधेन प्रमेयादिसामान्या
भाववत्तया पुनर्नाप्रसिद्धिः एकधर्मावच्छिन्नप्रतियोगिताकाभावत्वं चैकपदं स्वव्याप्यवृत्तिसाध्यकस्थलीयतिरस्कारेयाभिप्रा
येणतथाविधोपि कधर्मावच्छिन्नप्रतियोगितात्त्सामान्यभूत्परत्वमिति योजनेया यत्प्रतियोगितायाः अवच्छेदकीभूत यधर्मावच्छि
न्नानधिकरणत्वं हेतुमतस्तत्प्रतियोगितायाः अवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितासामान्यभू[illegible]त्वं तत्रार्थ इति वक्तुं गतिः न्यायवृत्ति
एकपदं स्वमगम्याद्धिके तथा तत्तदभावस्य वैशार्थभि[illegible]तितुरिक्तं मच्चः तन्निवेशस्य वैयर्थ्यात् यत्किंचित्पदेनैव तादृशार्थलाभा
दिति ध्येयं यद्यपि प्रमेयवान्वाच्यत्वादित्यादौ समवायेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियो
गितासामान्यभूत्परत्वाप्रसिद्धेः तादृशाभावांतरस्यानिरूपकप्रतियोगितानवच्छेदकतायाः प्रमेयत्वे सत्त्वात् तथापि तादृश
यत्किंचिदेकाभावप्रतियोगितात्वं यद्धर्मव्यापकतावच्छेदकं तत्त्वं विवक्षितं अस्ति च प्रमेयत्वव्यापकतत्वं प्रमेयसामान्याभा

४ग्रो हेतुसामानाधिकरण्यस्य वैयर्थ्या ४
=प्रवेश=

३४ वप्रतियोगितायामित्पदोषः ननु स्वावच्छेदकत्वं स्यात एवेति यत्किंचिदेकाभावप्रतियोगितासङ्केः प्रवेशादेवेत्यर्थः यदि सामा
न्याभावो नास्ति तदा वह्निमन्निष्ठतन्नूमाभावप्रतियोगितासामान्यशून्ये धूमान्तरे वर्तमानतया धूमत्वस्य निरुक्तावच्छेदकत्वं
नस्यात् इति व्याप्तिलक्षणातिव्याप्तिनिरासार्थमेव सामान्याभावः साधयिष्यते तथा च धूमसामान्याभावस्यैव वह्न्यनुसमानाधि
करणस्य प्रतियोगितासामान्यशून्ये घटादाववृत्तेर्धूमत्वस्यावच्छेदकत्वमिति भावः ननु तादृशप्रतियोगितायाश्च न्यूनानन
तुन तिरिक्तवृत्तित्ववाच्यं वह्नित्वे घटवृत्तितादृशप्रतियोगितान्यूनवृत्तेः तस्यादृष्टतारीति स्वाति प्रसंगादितितत्थाच व्याप्तिलक्षणा तारणी
संभव इति भावः एतेन नेत्यादिकाचित्कः पाठः एतेन तारणीतारीभियाभावमादाय दत्तदोषेण सामान्याभावप्रतियोगित्वमेक
मेव समस्तप्रतियोगिवृत्तीति तदनतिरिक्तवृत्तेर्धूमत्वस्य तेनोक्तातिव्याप्तिरिति प्रगल्भोक्तं दूषयति स्वातस्वेति उक्तरीत्या
वह्नित्वादाववच्छेदकत्वप्रसंगादेवेत्यर्थः ननु प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं स्वरूपसंबंधरूपं वा व्यासज्यावच्छे
च घप्रतियोगिताकत्वेन साध्यतावच्छेदकं पुनर्विशेषणीयं स्वातोणुहधर्मेण साध्यतो पानाति व्याप्तिरेतस्याहृ लघुरूपेति न ए८०
नु घटवान्महाकालत्वादित्यादावव्याप्तिभियैव गुरुरूपेण साध्यतायामतिव्याप्तिभियाश्च प्रतियोगिताधर्मिकोभयाभाव पि ३४

घटितंलक्षणंवाच्यंश्रतस्तदपिदूषयतिलघुरूपेत्यादिनाइत्यपिकश्चित्वह्नित्वादिलघुरूपसमनियतंयत्प्रमेयवह्नित्वा
दिकंतादृश्यरूपसाध्यतायांधूमादौव्याप्तिरित्यर्थः प्रतियोगितावच्छेदकेतिहेतुसमानाधिकरणाभावप्रतियोगितायायेदव
च्छेदकंतदभाववद्वृत्तित्वस्यधूमलक्षणप्रतियोगितावच्छेदकांतेनविवक्षितत्वादित्यर्थः अन्वयेनसंबंधेनप्रतियोगितावच्छेदक च
त्वेतेनैवतदभावोग्राह्यस्तेनधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकस्यघटत्वादेःकालिकादिसंबंधेनाभाववत्यामादौ [redacted]
[redacted] :वह्नित्वादेःसमवायेनाहत्वावपिनोक्तावच्छेदकत्वंनवाधूमत्वादेः
संयोगेनस्वाभाववतिसमवेतत्वेपिस्वावच्छेदकत्वहानिः यत्तुसाध्यतावच्छेदकताघटकसंबंधेनैवतदभावोग्राह्यइतितन्न
तुधूमत्वप्रकारकप्रमाविशेष्यवान्वह्निरित्यादावतिव्याप्तेः लघुतयाहेतुमन्निष्ठतादृशप्रमाविशेष्याभावप्रतियोगिता
वच्छेदकीभूतस्यधूमत्वादेःस्वरूपसंबंधेनाभाववतिधूमएवतादृशप्रमाविशेष्यत्वस्यवृत्तेः नह्यदवृत्तित्वंचस्वरूपसंबंधे
नतद्वृत्तिसाध्यतावच्छेदकताघटकसंबंधेनावर्तमानत्वंनातोधूमत्वाभावस्यैवकालिकसंबंधेनाधिकरणेधूमेसमवायेनस्व
रूपसंबंधेनचतदाश्रयेस्पंदादौकालिकतयाधूमत्वस्यवर्तमानत्वेप्यवच्छेदकत्वहानिः नचसमवायेनप्रमेयस्यसाध्यतायां

भावत्वादावति[illegible]
३५ [illegible] व्याप्तिः प्रमेयत्व
